श्रीललिता-सहस्र-नाम

पुष्प १

साधना-विधि
नामावली द्वारा
जपादि

हिन्दी व्याख्या
प्रार्थना एवं
स्तुति

श्री द्वारका मठ

श्री शृङ्गेरी मठ

जगद्-गुरु श्रीशङ्कराचार्य जी द्वारा
चारों दिशाओं में
श्रीललिता-त्रिपुर-सुन्दरी की आराधना

प्रकाशक : परा-वाणी आध्यात्मिक शोध-संस्थान
श्रीचण्डी-धाम, अलोपी-देवी मार्ग, प्रयाग-२११००६

उपयोगी पुस्तकें

पुस्तक	मूल्य
अद्भुत दुर्गा सप्तशती	१५०)
अलोप-शङ्करी देवी	५)
अघोर-पन्थ का निरूपण	२५)
अध्यात्म-योग	१०)
अक्षय-वट	१०)
अनुभूत साधना	२५)
आनन्द-लहरी	१२)
आदि-शङ्कराचार्य अङ्क	१०)
आपदुद्धारक श्रीबटुक-भैरव स्तोत्र	२५)
कमला-कल्पतरु, पुष्प-१, २, ३	१२०)
काली-पूजा-पद्धति	१००)
काली-नित्यार्चन	१५)
कृष्ण-साधना	२५)
काली-कल्पतरु	३००)
काश्मीर की वैचारिक परम्परा	१०)
कुण्डलिनी-साधना	४०)
कुम्भ-पर्व अङ्क	१०)
गङ्गा-यमुना-सरस्वती पूजा-अङ्क	५)
गायत्री-कल्पतरु	५०)
गुरु-तन्त्र (हिन्दी टीका सहित)	१५)
गुरु-तत्त्व-दर्शन एवं गुरु-साधना	१५)
चक्र-पूजा	३०)
चक्र-पूजा के स्तोत्र	२५)
छिन्न-मस्ता नित्यार्चन	२५)
तत्त्व-विवेचन	३)
तन्त्रोक्त शब्द-ब्रह्म-साधना	४५)
तारा-कल्पतरु	३५)
दकारादि श्री दुर्गा-सहस्त्र-नाम	२०)
दश महा-विद्या-अष्टोत्तर-शत-नामावली	३०)
दश महा-विद्या-अष्टोत्तर-शत-नाम	३०)
दश महा-विद्या-कवच	३०)
दश महा-विद्या-गायत्री एवं ध्यान	३०)
दश महा-विद्या तन्त्र	६०)
दिव्य योग	१०)
दीपावली की पूजा-विधि	१५)
दीपावली विशेषाङ्क	४५)
दीक्षा-प्रकाश	३५)
दुर्गा-साधना, पुष्प-१, २	५५)
दुर्गा सप्तशती (पद्यानुवाद)	२५)
दुर्गा सप्तशती (विशुद्ध-संस्करण)	४०)
दुर्गा सप्तशती (बीजात्मक)	१०)
दुर्गा-कल्पतरु (निबन्ध व स्तोत्र-संग्रह)	१५)
दुर्गा-सहस्त्र-नाम-साधना	५)
धन-प्राप्ति के प्रयोग	१०)
धर्म-चर्चा	१०)
धर्म-मार्ग पर	३५)
ध्यान-योग एवं विचार-योग	१०)
नवरात्र-कल्पतरु	१००)
नवरात्र-पूजा-पद्धति (वैदिक)	३)
नवग्रह-साधना (सचित्र)	१००)
निष्काम योग एवं कर्म-संन्यास योग	१५)
पञ्च-मकार तथा भाव-त्रय	४०)
पारायण-विधि	१०)
प्राण-तोषिणी तन्त्र (सर्ग, धर्म-काण्ड)	५०)
बगला-कल्पतरु	१००)
बगला-साधना, पुष्प-१	६०)
बाला-स्तव-मञ्जरी	२५)
बाला-कल्पतरु	३५)
बिहार के देवी-मन्दिर	१५)

श्रीचण्डी-धाम, अलोपी-देवी मार्ग, प्रयाग-२११००६ फोन: ०५३२-२५०२७८३, ०९४५०२२२७६७

वर्ष ७१ (१)

'कौल-कल्पतरु' चण्डी की विशेष प्रस्तुति

श्रीललिता-सहस्र-नाम

पुष्प-१

साधना-विधि
नामावली द्वारा जपादि
हिन्दी व्याख्या
प्रार्थना एवं स्तुति

*

व्याख्याकार

'कौल-कल्पतरु' श्रीश्यामानन्द नाथ

*

प्रार्थना एवं स्तुतिकार

'आशु-कवि' पं० हरिशास्त्री दाधीच

*

आदि-सम्पादक

प्रातः-स्मरणीय 'कुल-भूषण' पं० रमादत्त शुक्ल

सम्पादक

ऋतशील शर्मा

*

प्रकाशक

पण्डित देवीदत्त शुक्ल स्मारक

परा-वाणी आध्यात्मिक शोध-संस्थान

कल्याण मन्दिर प्रकाशन

श्रीचण्डी-धाम, प्रयाग-राज-२११००६ ☎ ९४५०२२२७६७

Email : chandi_dham@rediffmail.com

अनुदान ४५/-

प्रकाशक

पण्डित देवीदत्त शुक्ल स्मारक

परा-वाणी आध्यात्मिक शोध-संस्थान

कल्याण मन्दिर प्रकाशन

श्रीचण्डी-धाम, प्रयाग-राज-२११००६ ☎ ९४५०२२२७६७

श्रीललिता-सहस्र-नाम

भगवती त्रिपुर-सुन्दरी के तन्त्र-भेद से दस सहस्त्र-नाम हैं-

गङ्गा[१] भवानी[२] गायत्री[३], काली[४] लक्ष्मी:[५] सरस्वती[६]।
राज-राजेश्वरी[७] बाला[८], श्यामला[९] ललिता[१०] दश।।

उक्त दस सहस्त्र-नामों में श्रीललिता-सहस्त्र-नाम का महत्त्व सर्व-विदित है। इसके पाठ मात्र से कलि-युग के दोषों से मुक्ति प्राप्त होती है-

'तस्मात् संकीर्तयेन्नित्यं, कलि-दोष-निवृत्तये।'

परमेश्वरी भगवती ललिता

'सदानन्द-पूर्णा स्वात्मैव पर-देवता ललिता।'
('भावनोपनिषद्')
अर्थात् संसार की परमेश्वरी भगवती ललिता
सदा आनन्द से पूर्ण, आत्म-मय हैं।

चौथा संशोधित एवं परिवर्धित संस्करण

गुप्त नवरात्र, विश्वावसु सं० २०६९ वि०-२० जून, २०१२

परा-वाणी प्रेस, अलोपी-देवी मार्ग, प्रयाग-राज (उ०प्र०)

अनुक्रम

***

दो शब्द

'श्रीललिता-सहस्त्र-नाम' की बहुत अधिक ख्याति है। 'श्रीललिता-सहस्त्र-नाम' की लोक-प्रियता के कारण उसकी अनेक संस्कृत टीकाएँ एवं भाष्य ही नहीं हुए, अपितु अंग्रेजी एवं हिन्दी में भी उसके अनुवाद हुए। उदाहरण के लिए यहाँ आठ टीकाकारों का संक्षिप्त परिचय प्रस्तुत है-

१. श्रीविमर्शानन्दनाथ : श्रीविमलानन्दनाथ के शिष्य। इन्होंने संस्कृत में टीका लिखी।
२. श्रीविद्यारण्य मुनीश्वर : पूज्य-पाद श्री अनन्तारण्य के शिष्य।
३. श्रीभट्टनारायण : श्रीपरशिवानन्दनाथ के शिष्य। अद्वैत-विद्या के मर्मज्ञ श्रीवेङ्कटाद्रि और उनकी पत्नी श्रीमती नारायणाम्बा के पुत्र।
४. श्रीशङ्कर : इन्होंने सामान्य टीका की।
५. श्रीभासुरानन्दनाथ : 'सौभाग्य भास्कर' नामक प्रख्यात भाष्य के प्रणेता। प्रसिद्ध लौकिक नाम श्री भास्कर राय।
६. श्रीअनन्तकृष्ण शास्त्री : इन्होंने श्रीभास्कर राय के भाष्य का अंग्रेजी-अनुवाद सन् १९२५ में किया।
७. श्रीभारतभूषण : श्रीअनन्तकृष्ण शास्त्री के अंग्रेजी अनुवाद का इन्होंने हिन्दी-रूपान्तर सन् १९८९ में प्रकाशित कराया।
८. श्रीकल्याणानन्द भारती : 'कल्याण-श्रीकला' नामक भाष्य के प्रणेता।

हिन्दी में शाक्त-साहित्य के अभाव को दूर करने का सङ्कल्प लेनेवाले 'कौल-कल्पतरु' पं० देवीदत्त शुक्ल ने जब सन् १९४२ में अपने द्वारा प्रवर्तित 'चण्डी' में श्रीललिता-सहस्त्र-नाम की विशद व्याख्या 'राष्ट्र-भाषा' हिन्दी में प्रकाशित करने का विचार किया, तब भगवती की कृपा से आपको मिथिला के उच्च कोटि के एक साधक का सहयोग मिला, जिनका संक्षिप्त परिचय इस प्रकार है-

श्रीश्यामानन्दनाथ : लौकिक नाम श्रीइन्द्रपति सिंह। श्रीभास्करराय के भाष्य के आधार पर आपने हिन्दी में 'चण्डी' में धारावाहिक रूप से लिखा।

श्रीश्यामानन्दनाथ द्वारा लिखी उक्त व्याख्या को 'चण्डी' के मानद सम्पादक 'कुल-भूषण' पं० रमादत्त शुक्ल जी ने परिष्कृत कर पुस्तक रूप में सन् १९९० में प्रकाशित किया।

अब पुनः उक्त पुस्तक को कुछ पुष्पों में हम नवीन रूप में प्रकाशित कर रहे हैं। प्रस्तुत नवीन संस्करण में 'चण्डी' के प्रसिद्ध लेखक 'आशु-कवि' पं० हरि शास्त्री दाधीच के काव्य के आधार पर प्रार्थनाएँ एवं स्तुतियाँ भी दी जा रही हैं। इससे इसकी उपयोगिता और बढ़ जाएगी, इसमें सन्देह नहीं।

अन्त में, उल्लेखनीय है कि श्रीललिता-सहस्त्र-नाम का शुद्ध पाठ तैयार करने में गुप्तावतार बाबाश्री की हस्त-लिखित पुस्तक 'श्री-कल्पद्रुम' से बड़ी सहायता मिली है।

श्रीचण्डी-धाम, प्रयाग — -ऋतशील शर्मा

***

।।श्रीललिता-त्रिपुर-सुन्दर्यै नमः।।

श्रीललिता-सहस्र-नाम
(सविधि)

पूर्व-पीठिका

।।श्रीअगस्त्य उवाच।।

अश्वानन महा - बुद्धे, सर्व - शास्त्र - विशारद!।
कथितं ललिता - देव्याश्चरितं परमाद्भुतम्।।१
पूर्वं प्रादुर्भवो मातुस्ततः पट्टाभिषेचनम्।
भण्डासुर - वधश्चैव, विस्तारेण त्वयोदितः।।२
वर्णितं श्री - पुरं चापि, महा - विभव - विस्तरम्।
श्रीमत्-पञ्च-दशाक्षर्या, महिमा वर्णितस्तथा।।३
षोढा-न्यासादयो न्यासा, न्यास-खण्डे समीरिताः।।४
अन्तर्याग - क्रमश्चैव, बहिर्याग - क्रमस्तथा।
महा-याग - क्रमश्चैव, पूजा - खण्डे प्रकीर्तिताः।।५
पुरश्चरण - खण्डे तु, जप - लक्षणमीरितम्।
होम-खण्डे त्वया प्रोक्तो, होम-द्रव्य-विधि-क्रमः।।६
चक्र - राजस्य विद्यायाः, श्रीदेव्या देशिकात्मनोः।
रहस्य - खण्डे तादात्म्यं, परस्परमुदीरितम्।
स्तोत्र-खण्डे बहु-विधाः, स्तुतयः परि-कीर्तिताः।।७
मन्त्रिणी-दण्डिनी-देव्योः, प्रोक्ते नाम-सहस्रके।
न तु श्रीललिता-देव्याः, प्रोक्तं नाम-सहस्रकम्।।८
तत्र मे संशयो जातो, हयग्रीव दया - निधे!।
किं वा त्वया विस्मृतं तज्ज्ञात्वा वा समुपेक्षितम्।।९

मम वा योग्यता नास्ति, श्रोतुं नाम-सहस्त्रकम्।
किमर्थं भवता नोक्तं, तत्र मे कारणं वद।।१०

।।श्रीसूत उवाच।।

इति पृष्टो हय - ग्रीवो, मुनिना कुम्भ - जन्मना।
प्रहृष्टो वचनं प्राह, तापसं कुम्भ - सम्भवम्।।११

।।श्रीहयग्रीव उवाच।।

लोपा-मुद्रा-पतेऽगस्त्य!, सावधान-मनाः शृणु।
नाम्नां सहस्त्रं यन्नोक्तं, कारणं तद् वदामि ते।।१२
रहस्यमिति मत्वाऽहं, नोक्त-वांस्ते न चान्यथा।
पुनश्च पृच्छते भक्त्या, तस्मात् तत् ते वदाम्यहम् ।।१३
ब्रूयाच्छिष्याय भक्ताय, रहस्यमपि देशिकः।
भवता न प्रदेयं स्यादभक्ताय कदाचन।।१४
न शठाय न दुष्टाय, नाविश्वासाय कर्हि-चित्।
श्रीमातृ-भक्ति-युक्ताय, श्रीविद्या-राज-वेदिने।।१५
उपासकाय शुद्धाय, देयं नाम - सहस्त्रकम्।
यानि नाम - सहस्त्राणि, सद्यः सिद्धि - प्रदानि वै।।१६
तन्त्रेषु ललिता - देव्यास्तेषु मुख्यमिदं मुने!।
श्रीविद्यैव तु मन्त्राणां, तत्र कादिर्यथा परा।।१७
पुराणां श्रीपुरमिव, शक्तीनां ललिता यथा।
श्रीविद्योपासकानां च, यथा देवो वरः शिवः।।१८
तथा नाम - सहस्त्रेषु, वरमेतत् प्रकीर्तितम्।
यथाऽस्य पठनाद् देवी, प्रीयते ललिताऽम्बिका।।१९
अन्य - नाम - सहस्त्रस्य, पाठान्न प्रीयते तथा।
श्रीमातुः प्रीतये तस्मादनिशं कीर्तयेदिदम्।।२०
बिल्व-पत्रैश्चक्र-राजे, योऽर्चयेल्ललिताऽम्बिकाम्।
पद्मैर्वा तुलसी - पुष्पैरेभिर्नाम - सहस्त्रकैः।।२१

सद्यः प्रसादं कुरुते, तत्र सिंहासनेश्वरी।
चक्राधि - राजमभ्यर्च्य, जप्त्वा पञ्च-दशाक्षरीम्।।२२
जपान्ते कीर्तयेन्नित्यमिदं नाम - सहस्त्रकम्।
जप - पूजाद्यशक्तोऽपि, पठेन्नाम - सहस्त्रकम्।।२३
साङ्गार्चने साङ्ग - जपे, यत्-फलं तदवाप्नुयात्।
उपासने स्तुतीरन्याः, पठेदभ्युदयो हि सः।।२४
इदं नाम - सहस्त्रं तु, कीर्तयेन्नित्य-कर्म-वत्।
चक्र - राजार्चनं देव्या, जपो नाम्नां च कीर्तनम्।।२५
भक्तस्य कृत्यमेतावदन्यदभ्युदयं विदुः।
भक्तास्यवश्यकमिदं, नाम - साहस्त्र-कीर्तनम्।।२६
तत्र हेतुं प्रवक्ष्यामि, शृणु त्वं कुम्भ - सम्भव!।
पुरा श्रीललिता - देवी, भक्तानां हित-काम्यया।
वाग् - देवीर्वशिनी-मुख्याः, समाहूयेदमब्रवीत्।।२७

।।श्रीदेव्युवाच।।

"वाग् -देवता वशिन्याद्याः, शृणुध्वं वचनं मम।।२८
भवत्यो मत्-प्रसादेन, प्रोल्लसद्-वाग्-विभूतयः।
मद् - भक्तानां वाग् - विभूति-प्रदाने विनियोजिताः।।२९
मच्चक्रस्य रहस्यज्ञा, मम नाम - परायणाः।
मम स्तोत्र - विधानाय, तस्मादाज्ञापयामि वः।।३०
कुरुध्वमङ्कितं स्तोत्रं, मम नाम - सहस्त्रकैः।
येन भक्तैः स्तुताया मे, सद्यः प्रीतिः परा भवेत्"।।३१

।।श्रीहयग्रीव उवाच।।

इत्याज्ञप्ता वचो देव्यः, देव्या श्रीललिताऽम्बया।
रहस्यैर्नामभिर्दिव्यैश्चक्रुः स्तोत्रमनुत्तमम्।।३२

रहस्य - नाम - साहस्त्रमिति तद् विश्रुतं परम्।
ततः कदाचित् सदसि, स्थित्वा सिंहासनेऽम्बिका।।३३
स्व-सेवाऽवसरं प्रादात्, सर्वेषां कुम्भ - सम्भव!।
सेवार्थमागतास्तत्र, ब्रह्माणी - ब्रह्म - कोटयः।।३४
लक्ष्मी - नारायणानां च, कोटयः समुपागताः।
गौरी - कोटि - समेतानां, रुद्राणामपि कोटयः।।३५
मन्त्रिणी-दण्डिनी-मुख्याः, सेवार्थं याः समागताः।
शक्तयो विविधाकारास्तासां संख्या न विद्यते।।३६
दिव्यौघा मानवौघाश्च, सिद्धौघाश्च समागताः।
तत्र श्रीललिता - देवी, सर्वेषां दर्शनं ददौ।।३७
तेषु दृष्ट्वोपविष्टेषु, स्वे स्वे स्थाने यथा-क्रमम्।
तत्र श्रीललिता - देवी - कटाक्षाक्षेपनोदिताः।।३८
उत्थाय वशिनी - मुख्या, बद्धाञ्जलि-पुटास्तदा।
अस्तुवन् नाम-साहस्त्रैः, स्व-कृतैर्ललिताऽम्बिकाम्।।३९
श्रुत्वा स्तवं प्रसन्नाऽभूल्ललिता परमेश्वरी।
सर्वे ते विस्मयं जग्मुर्ये तत्र सदसि स्थिताः।।४०
ततः प्रोवाच ललिता, सदस्यान् देवता - गणान्।

।।श्रीदेव्युवाच।।

''ममाज्ञयैव वाग् - देव्यश्चक्रुः स्तोत्रमनुत्तमम्।।४१
अङ्कितं नामभिर्दिव्यैर्मम प्रीति - विधायकैः।
तत् पठध्वं सदा यूयं, स्तोत्रं मत् - प्रीति-वृद्धये।।४२
प्रवर्तयध्वं भक्तेषु, मम नाम - सहस्त्रकम्।
इदं नाम - सहस्त्रं मे, यो भक्तः पठते सकृत्।।४३

मम प्रिय - तमो ज्ञेयस्तस्मै कामान् ददाम्यहम्।
श्रीचक्रे मां समभ्यर्च्य, जप्त्वा पञ्च-दशाक्षरीम्।।४४
पश्चान्नाम - सहस्रं मे, कीर्तयेन्मम तुष्टये।
मामर्चयतु वा मा वा, विद्यां जपतु वा न वा।।४५
कीर्तयेन्नाम - साहस्रमिदं मत् - प्रीतये सदा।
मत्-प्रीत्या सकलान् कामाँल्लभते नात्र संशयः।।४६
तस्मान्नाम-साहस्रं मे, कीर्तयध्वं सदाऽऽदरात्''।

।।श्रीहयग्रीव उवाच।।

इति श्रीललितेशानी, शास्ति देवान् सहानुगान्।।४७
तदाज्ञया तदारभ्य, ब्रह्म - विष्णु - महेश्वराः।
शक्तयो मन्त्रिणी - मुख्या, इदं नाम - सहस्रकम्।।४८
पठन्ति भक्त्या सततं, ललिता - परितुष्टये।
तस्मादवश्यं भक्तेन, कीर्तनीयमिदं मुने!।।४९
आवश्यकत्वे हेतुस्ते, मया प्रोक्तो मुनीश्वर!।
इदानीं नाम - साहस्रं, वक्ष्यामि श्रद्धया शृणु।।५०

मूल-पाठ

।।विनियोगः।।

ॐ अस्य श्रीललिता-सहस्र-नाम-स्तोत्र-माला-मन्त्रस्य श्रीवशिन्यादि-वाग्-देवता ऋषयः। अनुष्टुप् छन्दः। श्रीललिताऽम्बा देवता। कएईलह्रीं बीजम्। सकलह्रीं शक्तिः। हसकहलह्रीं कीलकम्। श्रीललिताऽम्बा-प्रीत्यर्थे पाठे विनियोगः।

।।ऋष्यादि-न्यास।।

श्रीवशिन्यादि-वाग्-देवता-ऋषिभ्यो नमः शिरसि। अनुष्टुप्-छन्दसे नमः मुखे। श्रीललिताऽम्बा देवतायै नमः हृदि। कएईलह्रीं-बीजाय नमः गुह्ये। सकलह्रीं-शक्तये नमः पादयोः। हसकहलह्रीं-कीलकाय नमः सर्वाङ्गे। श्रीललिताऽम्बा-प्रीत्यर्थे पाठे विनियोगाय नमः अञ्जलौ।

	कर-न्यास	अङ्ग-न्यास
ऐं कएईलह्रीं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
क्लीं हसकहलह्रीं	तर्जनीभ्यां नमः	शिरसे स्वाहा
सौः सकलह्रीं	मध्यमाभ्यां नमः	शिखायै वषट्
ऐं कएईलह्रीं	अनामाभ्यां नमः	कवचाय हुम्
क्लीं हसकहलह्रीं	कनिष्ठाभ्यां नमः	नेत्र-त्रयाय वौषट्
सौः सकलह्रीं	करतल-करपृष्ठाभ्यां नमः	अस्त्राय फट्

।।ध्यानम्।।

सिन्दूरारुण-विग्रहां त्रि-नयनां माणिक्य-मौलि-स्फुरत्-
तारा-नायक-शेखरां स्मित-मुखीमापीन-वक्षो-रुहाम्।
पाणिभ्यामलि-पूर्ण-रत्न-चषकं रक्तोत्पलं बिभ्रतीम्,
सौम्यां रत्न-घटस्थ-रक्त-चरणां ध्याये परामम्बिकाम्।।

।।मानस पूजन।।

ॐ लं पृथिव्यात्मकं गन्धं श्रीललिताम्बा-प्रीतये समर्पयामि नमः (अधो-मुख कनिष्ठा-अंगुष्ठ)।
ॐ हं आकाशात्मकं पुष्पं श्रीललिताम्बा-प्रीतये समर्पयामि नमः (अधो-मुख तर्जनी-अंगुष्ठ)।
ॐ यं वाय्वात्मकं धूपं श्रीललिताम्बा-प्रीतये घ्रापयामि नमः (ऊर्ध्व-मुख तर्जनी-अंगुष्ठ)।
ॐ रं वह्न्यात्मकं दीपं श्रीललिताम्बा-प्रीतये दर्शयामि नमः (ऊर्ध्व-मुख मध्यमा-अंगुष्ठ)।
ॐ वं अमृतात्मकं नैवेद्यं श्रीललिताम्बा-प्रीतये निवेदयामि नमः (ऊर्ध्व-मुख अनामा-अंगुष्ठ)।
ॐ सं सर्वात्मकं ताम्बूलं श्रीललिताम्बा-प्रीतये समर्पयामि नमः (ऊर्ध्व-मुख सर्वांगुलि)।

।।श्रीहयग्रीव उवाच।।

ॐ श्रीमाता[१] श्रीमहा - राज्ञी[२], श्रीमत्-सिंहासनेश्वरी[३]।
चिदग्नि - कुण्ड - सम्भूता[४], देव - कार्य - समुद्यता[५]।।१
उद्यद् - भानु - सहस्त्राभा[६], चतुर्बाहु - समन्विता[७]।
राग - स्वरूप - पाशाढ्या[८], क्रोधाकारांकुशोज्ज्वला[९]।।२
मनो - रूपेक्षु - कोदण्डा[१०], पञ्च - तन्मात्र - सायका[११]।
निजारुण - प्रभा - पूर - मज्जद् - ब्रह्माण्ड - मण्डला[१२]।।३

चम्पकाशोक - पुन्नाग - सौगन्धिक - लसत् - कचा[१३]।
कुरुविन्द - मणि - श्रेणी - कनत् - कोटीर - मण्डिता[१४]।।०४
अष्टमी - चन्द्र - विभ्राजदलिक - स्थल - शोभिता[१५]।
मुख - चन्द्र - कलङ्काभ - मृग - नाभि - विशेषका[१६]।।०५
वदन - स्मर - माङ्गल्य - गृह - तोरण - चिल्लिका[१७]।
वक्त्र - लक्ष्मी - परीवाह - चलन्मीनाभ - लोचना[१८]।।०६
नव - चम्पक - पुष्पाभ - नासा - दण्ड - विराजिता[१९]।
तारा - कान्ति - तिरस्कारि - नासाऽऽभरण - भासुरा[२०]।।०७
कदम्ब - मञ्जरी - क्लृप्त - कर्णपूर - मनोहरा[२१]।
ताटङ्क - युगली - भूत - तपनोडुप - मण्डला[२२]।।०८
पद्म - राग - शिलाऽऽदर्श - परिभावि - कपोल - भूः[२३]।
नव - विद्रुम - बिम्ब - श्रीन्यक्कारि - दशनच्छदा[२४]।।०९
शुद्ध - विद्यांकुराकार - द्विज - पंक्ति - द्वयोज्ज्वला[२५]।
कर्पूर - वीटिकाऽऽमोद - समाकर्षि - दिगन्तरा[२६]।।१०
निज - संल्लाप - माधुर्य - विनिर्भर्त्सित - कच्छपी[२७]।
मन्द - स्मित - प्रभा - पूर - मज्जत् - कामेश - मानसा[२८]।।११
अनाकलित - सादृश्य - चिबुक - श्री - विराजिता[२९]।
कामेश - बद्ध - माङ्गल्य - सूत्र - शोभित - कन्धरा[३०]।।१२
कनकाङ्गद - केयूर - कमनीय - भुजान्विता[३१]।
रत्न - ग्रैवेय - चिन्ताक - लोल - मुक्ता - फलान्विता[३२]।।१३
कामेश्वर - प्रेम - रत्न - मणि - प्रति - पण - स्तनी[३३]।
नाभ्याल - वाल - रोमालि - लता - फल - कुच - द्वयी[३४]।।१४
लक्ष्य - रोम - लताधारता - समुन्नेय - मध्यमा[३५]।
स्तन - भार - दलन्मध्य - पट्ट - बन्ध - वलि - त्रया[३६]।।१५

अरुणारुण - कौसुम्भ - वस्त्र - भास्वत् - कटी - तटी[37]।
रत्न - किङ्किणिका - रम्य - रशना - दाम - भूषिता[38]।।१६
कामेश - ज्ञात - सौभाग्यमार्दवोरु - द्वयान्विता[39]।
माणिक्य - मुकुटाकार - जानु - द्वय - विराजिता[40]।।१७
इन्द्र - गोप - परिक्षिप्त - स्मर - तूणाभ - जङ्घिका[41]।
गूढ - गुल्फा[42] कूर्म - पृष्ठ - जयिष्णु - प्रपदान्विता[43]।।१८
नख - दीधिति - सञ्छन्न - नमज्जन - तमो - गुणा[44]।
पद - द्वय - प्रभा - जाल - परा - कृत - सरोरुहा[45]।।१९
शिञ्जान - मणि - मञ्जीर - मण्डित - श्री - पदाम्बुजा[46]।
मराली - मन्द - गमना[47], महा - लावण्य - शेवधिः[48]।।२०
सर्वारुणाऽनवद्याङ्गी[49-50], सर्वाभरण - भूषिता[51]।
शिव - कामेश्वराङ्कस्था[52], शिवा[53] स्वाधीन - वल्लभा[54]।।२१
सुमेरु - शृङ्ग - मध्यस्था[55], श्रीमन्नगर - नायिका[56]।
चिन्ता - मणि - गृहान्तःस्था[57], पञ्च-ब्रह्मासन-स्थिता[58]।।२२
महा - पद्माटवी - संस्था[59], कदम्ब - वन - वासिनी[60]।
सुधा - सागर - मध्यस्था[61], कामाक्षी[62] काम - दायिनी[63]।।२३
देवर्षि - गण - सङ्घात - स्तूय - मानात्म - वैभवा[64]।
भण्डासुर - वधोद्युक्त - शक्ति - सेना - समन्विता[65]।।२४
सम्पत् - करी - समारूढ - सिन्धुर - व्रज - सेविता[66]।
अश्वारूढाऽधिष्ठिताश्व - कोटि - कोटभिरावृता[67]।।२५
चक्र - राज - रथारूढ - सर्वायुध - परिष्कृता[68]।
गेय - चक्र - रथारूढ - मन्त्रिणी - परि - सेविता[69]।।२६
किरि - चक्र - रथारूढ - दण्ड - नाथा - पुरस्कृता[70]।
ज्वाला - मालिनिका - क्षिप्त - वह्नि - प्राकार - मध्यगा[71]।।२७

भण्ड - सैन्य - वधोद्युक्त - शक्ति - विक्रम - हर्षिता[७२]।
नित्या - पराक्रमाऽऽटोप - निरीक्षण - समुत्सुका[७३]।।२८
भण्ड - पुत्र - वधोद्युक्त - बाला - विक्रम - नन्दिता[७४]।
मन्त्रिण्यम्बा - विरचित - विशुक्र - वध - तोषिता[७५]।।२९
विषङ्ग - प्राण - हरण - वाराही - वीर्य - नन्दिता[७६]।
कामेश्वर - मुखालोक - कल्पित - श्रीगणेश्वरा[७७]।।३०
महा - गणेश - निर्भिन्न - विघ्न - यन्त्र - प्रहर्षिता[७८]।
भण्डासुरेन्द्र - निर्मुक्त - शस्त्र - प्रत्यस्त्र - वर्षिणी[७९]।।३१
करांगुलि - नखोत्पन्न - नारायण - दशाकृतिः[८०]।
महा - पाशुपतास्त्राग्नि - निर्दग्धासुर - सैनिका[८१]।।३२
कामेश्वरास्त्र - निर्दग्ध - स - भण्डासुर - शून्यका[८२]।
ब्रह्मोपेन्द्र - महेन्द्रादि - देव - संस्तुत - वैभवा[८३]।।३३
हर - नेत्राग्नि - सन्दग्ध - काम - सञ्जीवनौषधिः[८४]।
श्रीमद् - वाग्भव - कूटैक - स्वरूप - मुख - पङ्कजा[८५]।।३४
कण्ठाधः - कटि - पर्यन्त - मध्य - कूट - स्वरूपिणी[८६]।
शक्ति - कूटैकताऽऽपन्न - कट्यधो - भाग - धारिणी[८७]।।३५
मूल - मन्त्रात्मिका[८८] मूल - कूट - त्रय - कलेवरा[८९]।
कुलामृतैक - रसिका[९०], कुल - सङ्केत - पालिनी[९१]।।३६
कुलाङ्गना[९२] कुलान्तःस्था[९३], कौलिनी[९४] कुल-योगिनी[९५]।
अकुला[९६] समयान्तःस्था[९७], समयाचार - तत्परा[९८]।।३७
मूलाधारैक - निलया[९९], ब्रह्म - ग्रन्थि - विभेदिनी[१००]।
मणिपूरान्तरुदिता[१०१], विष्णु - ग्रन्थि - विभेदिनी[१०२]।।३८

आज्ञा-चक्रान्तरालस्था[१०३], रुद्र-ग्रन्थि-विभेदिनी[१०४]।
सहस्राराम्बुजारूढा[१०५], सुधा - साराभि - वर्षिणी[१०६]।।३९
तडिल्लता-सम-रुचिः[१०७], षट्-चक्रोपरि-संस्थिता[१०८]।
महा-शक्तिः[१०९] कुण्डलिनी[११०], विस-तन्तु-तनीयसी[१११]।।४०
भवानी[११२] भावना-गम्या[११३], भवारण्य-कुठारिका[११४]।
भद्र-प्रिया[११५] भद्र-मूर्तिः[११६], भक्त-सौभाग्य-दायिनी[११७]।।४१
भक्ति-प्रिया[११८] भक्ति-गम्या[११९], भक्ति-वश्या[१२०] भयापहा[१२१]।
शाम्भवी[१२२] शारदाऽऽराध्या[१२३], शर्वाणी[१२४] शर्म-दायिनी[१२५]।।४२
शाङ्करी[१२६] श्री-करी[१२७] साध्वी[१२८], शरच्चन्द्र-निभानना[१२९]।
शातोदरी[१३०] शान्ति-मती[१३१], निराधारा[१३२] निरञ्जना[१३३]।।४३
निर्लेपा[१३४] निर्मला[१३५] नित्या[१३६], निराकारा[१३७] निराकुला[१३८]।
निर्गुणा[१३९] निष्कला[१४०] शान्ता[१४१], निष्कामा[१४२] निरुपप्लवा[१४३]।।४४
नित्य-मुक्ता[१४४] निर्विकारा[१४५], निष्प्रपञ्चा[१४६] निराश्रया[१४७]।
नित्य-शुद्धा[१४८] नित्य-बुद्धा[१४९], निरवद्या[१५०] निरन्तरा[१५१]।।४५
निष्कारणा[१५२] निष्कलङ्का[१५३], निरुपाधिः[१५४] निरीश्वरा[१५५]।
नीरागा[१५६] राग-मथिनी[१५७], निर्मदा[१५८] मद-नाशिनी[१५९]।।४६
निश्चिन्ता[१६०] निरहङ्कारा[१६१], निर्मोहा[१६२] मोह-नाशिनी[१६३]।
निर्ममा[१६४] ममता-हन्त्री[१६५], निष्पापा[१६६] पाप-नाशिनी[१६७]।।४७
निष्क्रोधा[१६८] क्रोध-शमिनी[१६९], निर्लोभा[१७०] लोभ-नाशिनी[१७१]।
निःसंशया[१७२] संशयघ्नी[१७३], निर्भवा[१७४] भव-नाशिनी[१७५]।।४८
निर्विकल्पा[१७६] निराबाधा[१७७], निर्भेदा[१७८] भेद-नाशिनी[१७९]।
निर्नाशा[१८०] मृत्यु-मथिनी[१८१], निष्क्रिया[१८२] निष्परिग्रहा[१८३]।।४९
निस्तुला[१८४] नील-चिकुरा[१८५], निरपाया[१८६] निरत्यया[१८७]।
दुर्लभा[१८८] दुर्गमा[१८९] दुर्गा[१९०], दुःख-हन्त्री[१९१] सुख-प्रदा[१९२]।।५०

दुष्ट - दूरा[११३] दुराचार - शमनी[११४] दोष - वर्जिता[११५]।
सर्वज्ञा[११६] सान्द्र - करुणा[११७], समानाधिक - वर्जिता[११८]।।५१
सर्व-शक्ति-मयी[११९] सर्व-मङ्गला[२००] सद्-गति-प्रदा[२०१]।
सर्वेश्वरी[२०२] सर्व - मयी[२०३], सर्व-मन्त्र-स्वरूपिणी[२०४]।।५२
सर्व-यन्त्रात्मिका[२०५] सर्व-तन्त्र-रूपा[२०६] मनोन्मनी[२०७]।
माहेश्वरी[२०८] महा-देवी[२०९], महा-लक्ष्मीः[२१०] मृड-प्रिया[२११]।।५३
महा-रूपा[२१२] महा-पूज्या[२१३], महा-पातक-नाशिनी[२१४]।
महा-माया[२१५] महा-सत्त्वा[२१६], महा-शक्तिः[२१७] महा-रतिः[२१८]।।५४
महा-भोगा[२१९] महैश्वर्या[२२०], महा-वीर्या[२२१] महा-बला[२२२]।
महा-बुद्धिः[२२३] महा-सिद्धिः[२२४], महा-योगेश्वरेश्वरी[२२५]।।५५
महा-तन्त्रा[२२६] महा-मन्त्रा[२२७], महा-यन्त्रा[२२८] महाऽऽसना[२२९]।
महा - याग - क्रमाराध्या[२३०], महा-भैरव-पूजिता[२३१]।।५६
महेश्वर - महा - कल्प - महा - ताण्डव-साक्षिणी[२३२]।
महा - कामेश - महिषी[२३३], महा -त्रिपुर - सुन्दरी[२३४]।।५७
चतुः-षष्ट्युपचाराढ्या[२३५], चतुः-षष्टि-कला-मयी[२३६]।
महा-चतुः-षष्टि-कोटि - योगिनी - गण-सेविता[२३७]।।५८
मनु-विद्या[२३८] चन्द्र-विद्या[२३९], चन्द्र - मण्डल-मध्यगा[२४०]।
चारु-रूपा[२४१] चारु-हासा[२४२], चारु-चन्द्र-कला-धरा[२४३]।।५९
चराचर - जगन्नाथा[२४४], चक्र - राज - निकेतना[२४५]।
पार्वती[२४६] पद्म - नयना[२४७], पद्म - राग - सम - प्रभा[२४८]।।६०
पञ्च - प्रेतासनासीना[२४९], पञ्च - ब्रह्म - स्वरूपिणी[२५०]।
चिन्मयी[२५१] परमानन्दा[२५२], विज्ञान - घन - रूपिणी[२५३]।।६१

ध्यान - ध्यातृ-ध्येय-रूपा[२५४], धर्माधर्म - विवर्जिता[२५५]।
विश्व-रूपा[२५६] जागरिणी[२५७], स्वपन्ती[२५८] तैजसात्मिका[२५९]।।६२
सुप्ता[२६०] प्राज्ञात्मिका[२६१] तुर्या[२६२], सर्वावस्था-विवर्जिता[२६३]।
सृष्टि-कर्त्री[२६४] ब्रह्म-रूपा[२६५], गोप्त्री[२६६] गोविन्द-रूपिणी[२६७]।।६३
संहारिणी[२६८] रुद्र-रूपा[२६९], तिरोधान - करीश्वरी[२७०-७१]।
सदा-शिवाऽनुग्रहदा[२७२-७३], पञ्च - कृत्य - परायणा[२७४]।।६४
भानु-मण्डल-मध्यस्था[२७५], भैरवी[२७६] भग-मालिनी[२७७]।
पद्मासना[२७८] भगवती[२७९], पद्म - नाभ - सहोदरी[२८०]।।६५
उन्मेष - निमेषोत्पन्न - विपन्न - भुवनावली[२८१]।
सहस्र - शीर्ष - वदना[२८२], सहस्राक्षी[२८३] सहस्र-पात्[२८४]।।६६
आब्रह्म - कीट - जननी[२८५], वर्णाश्रम - विधायिनी[२८६]।
निजाज्ञा - रूप - निगमा[२८७], पुण्यापुण्य - फल - प्रदा[२८८]।।६७
श्रुति - सीमन्त - सिन्दूरी - कृत - पादाब्ज - धूलिका[२८९]।
सकलागम - सन्दोह - शुक्ति - सम्पुट - मौक्तिका[२९०]।।६८
पुरुषार्थ - प्रदा[२९१] पूर्णा[२९२], भोगिनी[२९३] भुवनेश्वरी[२९४]।
अम्बिकाऽनादि - निधना[२९५-९६], हरि-ब्रह्मेन्द्र-सेविता[२९७]।।६९
नारायणी[२९८] नाद-रूपा[२९९], नाम-रूप-विवर्जिता[३००]।
ह्रीङ्कारी[३०१] ह्रीमती[३०२] हृद्या[३०३], हेयोपादेय-वर्जिता[३०४]।।७०
राज-राजार्चिता[३०५] राज्ञी[३०६], रम्या[३०७] राजीव-लोचना[३०८]।
रञ्जनी[३०९] रमणी[३१०] रस्या[३११], रणत्-किङ्किणि-मेखला[३१२]।।७१
रमा[३१३] राकेन्दु-वदना[३१४], रति-रूपा[३१५] रति-प्रिया[३१६]।
रक्षा-करी[३१७] राक्षसघ्नी[३१८], रामा[३१९] रमण-लम्पटा[३२०]।।७२

काम्या[३२१] काम-कला-रूपा[३२२], कदम्ब-कुसुम-प्रिया[३२३]।
कल्याणी[३२४] जगती-कन्दा[३२५], करुणा-रस-सागरा[३२६]।।७३
कला-वती[३२७] कलाऽऽलापा[३२८], कान्ता[३२९] कादम्बरी-प्रिया[३३०]।
वरदा[३३१] वाम - नयना[३३२], वारुणी-मद-विह्वला[३३३]।।७४
विश्वाधिका[३३४] वेद-वेद्या[३३५], विन्ध्याचल-निवासिनी[३३६]।
विधात्री[३३७] वेद-जननी[३३८], विष्णु-माया[३३९] विलासिनी[३४०]।।७५
क्षेत्र-स्वरूपा[३४१] क्षेत्रेशी[३४२], क्षेत्र-क्षेत्रज्ञ - पालिनी[३४३]।
क्षय - वृद्धि - विनिर्मुक्ता[३४४], क्षेत्रपाल - समर्चिता[३४५]।।७६
विजया[३४६] विमला[३४७] वन्द्या[३४८], वन्दारु-जन-वत्सला[३४९]।
वाग्-वादिनी[३५०] वाम-केशी[३५१], वह्नि-मण्डल-वासिनी[३५२]।।७७
भक्ति-मत्-कल्प-लतिका[३५३], पशु-पाश-विमोचिनी[३५४]।
संहृताशेष - पाखण्डा[३५५], सदाचार - प्रवर्तिका[३५६]।।७८
ताप - त्रयाग्नि - सन्तप्त - समाह्लादन - चन्द्रिका[३५७]।
तरुणी[३५८] तापसाराध्या[३५९], तनु-मध्या[३६०] तमोऽपहा[३६१]।।७९
चितिः[३६२] तत्-पद-लक्ष्यार्था[३६३], चिदेक-रस-रूपिणी[३६४]।
स्वात्मानन्द - लवी - भूत - ब्रह्माद्यानन्द - सन्ततिः[३६५]।।८०
परा[३६६] प्रत्यक्-चिती-रूपा[३६७], पश्यन्ती[३६८] पर-देवता[३६९]।
मध्यमा[३७०] वैखरी-रूपा[३७१], भक्त-मानस-हंसिका[३७२]।।८१
कामेश्वर-प्राण-नाडी[३७३], कृतज्ञा[३७४] काम-पूजिता[३७५]।
शृङ्गार-रस-सम्पूर्णा[३७६], जया[३७७] जालन्धर-स्थिता[३७८]।।८२
ओड्याण-पीठ-निलया[३७९], बिन्दु-मण्डल-वासिनी[३८०]।
रहो - याग - क्रमाराध्या[३८१], रहस्तर्पण - तर्पिता[३८२]।।८३
सद्यः-प्रसादिनी[३८३] विश्व-साक्षिणी[३८४] साक्षि-वर्जिता[३८५]।
षडङ्ग - देवता - युक्ता[३८६], षाड् - गुण्य - परि - पूरिता[३८७]।।८४

नित्य-क्लिन्ना[३८८] निरुपमा[३८९], निर्वाण-सुख-दायिनी[३९०]।
नित्या-षोडशिका-रूपा[३९१], श्रीकण्ठार्ध-शरीरिणी[३९२]।।८५
प्रभा-वती[३९३] प्रभा-रूपा[३९४], प्रसिद्धा[३९५] परमेश्वरी[३९६]।
मूल-प्रकृतिरव्यक्ता[३९७-९८], व्यक्ताव्यक्त-स्वरूपिणी[३९९]।।८६
व्यापिनी[४००] विविधाकारा[४०१], विद्याऽविद्या-स्वरूपिणी[४०२]।
महा - कामेश - नयन - कुमुदाह्लाद - कौमुदी[४०३]।।८७
भक्त- हार्द - तमो - भेद - भानु - मद् -भानु-सन्तति:[४०४]।
शिव-दूती[४०५] शिवाराध्या[४०६], शिव-मूर्ति:[४०७] शिवङ्करी[४०८]।।८८
शिव-प्रिया[४०९] शिव-परा[४१०], शिष्टेष्टा[४११] शिष्ट-पूजिता[४१२]।
अप्रमेया[४१३] स्व - प्रकाशा[४१४], मनो - वाचामगोचरा[४१५]।।८९
चिच्छक्तिश्चेतना-रूपा[४१६-१७], जड-शक्ति:[४१८] जडात्मिका[४१९]।
गायत्री[४२०] व्याहृति:[४२१] सन्ध्या[४२२], द्विज-वृन्द-निषेविता[४२३]।।९०
तत्त्वासना[४२४] तत्त्व-मयी[४२५-२७], पञ्च-कोशान्तर-स्थिता[४२८]।
नि:सीम-महिमा[४२९] नित्य-यौवना[४३०] मद-शालिनी[४३१]।।९१
मद - घूर्णित - रक्ताक्षी[४३२], मद - पाटल-गण्ड-भू:[४३३]।
चन्दन-द्रव-दिग्धाङ्गी[४३४], चाम्पेय - कुसुम - प्रिया[४३५]।।९२
कुशला[४३६] कोमलाऽऽकारा[४३७], कुरु-कुल्ला[४३८] कुलेश्वरी[४३९]।
कुल - कुण्डालया[४४०] कौल - मार्ग - तत्पर - सेविता[४४१]।।९३
कुमार-गण-नाथाम्बा[४४२], तुष्टि:[४४३] पुष्टिर्मतिर्धृति:[४४४-४६]।
शान्ति:[४४७] स्वस्ति-मती[४४८], कान्ति:[४४९] नन्दिनी[४५०] विघ्न-नाशिनी[४५१]।।९४
तेजो-वती[४५२] त्रि-नयना[४५३], लोलाक्षी-काम-रूपिणी[४५४]।
मालिनी[४५५] हंसिनी[४५६] माता[४५७], मलयाचल-वासिनी[४५८]।।९५

सुमुखी[४५९] नलिनी[४६०] सुभ्रूः[४६१], शोभना[४६२] सुर-नायिका[४६३]।
काल-कण्ठी[४६४] कान्ति-मती[४६५], क्षोभिणी[४६६] सूक्ष्म-रूपिणी[४६७]।।९६
वज्रेश्वरी[४६८] वाम-देवी[४६९], वयोऽवस्था - विवर्जिता[४७०]।
सिद्धेश्वरी[४७१] सिद्ध-विद्या[४७२], सिद्ध-माता[४७३] यशस्विनी[४७४]।।९७
विशुद्धि-चक्र-निलयाऽऽरक्त-वर्णा[४७५-७६] त्रि-लोचना[४७७]।
खट्वाङ्गादि - प्रहरणा[४७८], वदनैक - समन्विता[४७९]।।९८
पायसान्न-प्रिया[४८०] त्वक्-स्था[४८१], पशु-लोक-भयङ्करी[४८२]।
अमृतादि - महा - शक्ति - संवृता[४८३] डाकिनीश्वरी[४८४]।।९९
अनाहताब्ज - निलया[४८५], श्यामाभा[४८६] वदन - द्वया[४८७]।
दंष्ट्रोज्ज्वलाक्ष-मालादि-धरा[४८८-८९] रुधिर-संस्थिता[४९०]।।१००
काल-रात्र्यादि-शक्त्यौघ-वृता[४९१] स्निग्धौदन-प्रिया[४९२]।
महा - वीरेन्द्र - वरदा[४९३], राकिण्यम्बा - स्वरूपिणी[४९४]।।१०१
मणि - पूराब्ज - निलया[४९५], वदन - त्रय - संयुता[४९६]।
वज्रादिकायुधोपेता[४९७], डामर्यादिभिरावृता[४९८]।।१०२
रक्त-वर्णा[४९९] मांस-निष्ठा[५००], गुडान्न-प्रीत-मानसा[५०१]।
समस्त - भक्त - सुखदा[५०२], लाकिन्यम्बा - स्वरूपिणी[५०३]।।१०३
स्वाधिष्ठानाम्बुज - गता[५०४], चतुर्वक्त्र - मनोहरा[५०५]।
शूलाद्यायुध - सम्पन्ना[५०६], पीत - वर्णाऽति - गर्विता[५०७-८]।।१०४
मेदो-निष्ठा[५०९] मधु-प्रीता[५१०], बन्धिन्यादि-समन्विता[५११]।
दध्यन्नासक्त - हृदया[५१२], काकिनी-रूप - धारिणी[५१३]।।१०५
मूलाधाराम्बुजारूढा[५१४], पञ्च-वक्त्राऽस्थि-संस्थिता[५१५-१६]।
अंकुशादि - प्रहरणा[५१७], वरदादि - निषेविता[५१८]।।१०६

मुद्गौदनासक्त-चित्ता[५१९], साकिन्यम्बा-स्वरूपिणी[५२०]।
आज्ञा-चक्राब्ज-निलया[५२१], शुक्ल-वर्णा[५२२] षडानना[५२३]।।१०७
मज्जा - संस्था[५२४] हंस-वती - मुख्य - शक्ति - समन्विता[५२५]।
हरिद्रान्नैक - रसिका[५२६], हाकिनी - रूप - धारिणी[५२७]।।१०८
सहस्त्र- दल - पद्मस्था[५२८], सर्व - वर्णोपशोभिता[५२९]।
सर्वायुध - धरा[५३०] शुक्र - संस्थिता[५३१] सर्वतोमुखी[५३२]।।१०९
सर्वौदन - प्रीत - चित्ता[५३३], याकिन्यम्बा-स्वरूपिणी[५३४]।
स्वाहा[५३५] स्वधा[५३६] मतिः[५३७] मेधा[५३८], श्रुति-स्मृतिरनुत्तमा[५३९-४१]।।११०
पुण्य-कीर्तिः[५४२] पुण्य-लभ्या[५४३], पुण्य-श्रवण-कीर्तना[५४४]।
पुलोमजाऽर्चिता[५४५] बन्ध - मोचिनी[५४६] बन्धुरालका[५४७]।।१११
विमर्श-रूपिणी[५४८] विद्या[५४९], वियदादि-जगत्-प्रसूः[५५०]।
सर्व - व्याधि - प्रशमनी[५५१], सर्व-मृत्यु-निवारिणी[५५२]।।११२
अग्र-गण्याऽचिन्त्य-रूपा[५५३-५४], कलि-कल्मष-नाशिनी[५५५]।
कात्यायनी[५५६] काल-हन्त्री[५५७], कमलाक्ष-निषेविता[५५८]।।११३
ताम्बूल - पूरित - मुखी[५५९], दाडिमी - कुसुम - प्रभा[५६०]।
मृगाक्षी[५६१] मोहिनी[५६२] मुख्या[५६३], मृडानी[५६४] मित्र-रूपिणी[५६५]।।११४
नित्य-तृप्ता[५६६] भक्त-निधिः[५६७], नियन्त्री[५६८] निखिलेश्वरी[५६९]।
मैत्र्यादि-वासना-लभ्या[५७०], महा-प्रलय-साक्षिणी[५७१]।।११५
परा-शक्तिः[५७२] परा-निष्ठा[५७३], प्रज्ञान-घन-रूपिणी[५७४]।
माध्वी-पानालसा[५७५] मत्ता[५७६], मातृका-वर्ण-रूपिणी[५७७]।।११६
महा - कैलास - निलया[५७८], मृणाल - मृदु - दोर्लता[५७९]।
महनीया[५८०] दया-मूर्तिः[५८१], महा-साम्राज्य-शालिनी[५८२]।।११७
आत्म-विद्या[५८३] महा-विद्या[५८४], श्रीविद्या[५८५] काम-सेविता[५८६]।
श्रीषोडशाक्षरी-विद्या[५८७], त्रिकूटा[५८८] काम-कोटिका[५८९]।।११८

कटाक्ष - किङ्करी - भूत - कमला - कोटि - सेविता[५९०]।
शिरः-स्थिता[५९१] चन्द्र-निभा[५९२], भालस्थेन्द्र-धनुष्प्रभा[५९३-९४]।।११९
हृदयस्था[५९५] रवि-प्रख्या[५९६], त्रिकोणान्तर-दीपिका[५९७]।
दाक्षायणी[५९८] दैत्य-हन्त्री[५९९], दक्ष-यज्ञ-विनाशिनी[६००]।।१२०
दरान्दोलित - दीर्घाक्षी[६०१], दर - हासोज्ज्वलन्मुखी[६०२]।
गुरु-मूर्तिः[६०३] गुण-निधिः[६०४], गो-माता[६०५] गुह-जन्म-भूः[६०६]।।१२१
देवेशी[६०७] दण्ड - नीतिस्था[६०८], दहराकाश - रूपिणी[६०९]।
प्रतिपन्मुख्य - राकान्त - तिथि - मण्डल - पूजिता[६१०]।।१२२
कलात्मिका[६११] कला-नाथा[६१२], काव्यालाप-विमोदिनी[६१३]।
स - चामर - रमा - वाणी - सव्य-दक्षिण-सेविता[६१४]।।१२३
आदि - शक्तिरमेयात्मा[६१५-१७], परमा[६१८] पावनाकृतिः[६१९]।
अनेक - कोटि - ब्रह्माण्ड - जननी[६२०] दिव्य-विग्रहा[६२१]।।१२४
क्लीङ्कारी[६२२] केवला[६२३] गुह्या[६२४], कैवल्य-पद-दायिनी[६२५]।
त्रिपुरा[६२६] त्रि-जगद्-वन्द्या[६२७], त्रि-मूर्तिः[६२८] त्रि-दशेश्वरी[६२९]।।१२५
त्र्यक्षरी[६३०] दिव्य-गन्धाढ्या[६३१], सिन्दूर-तिलकाञ्चिता[६३२]।
उमा[६३३] शैलेन्द्र-तनया[६३४], गौरी[६३५] गन्धर्व-सेविता[६३६]।।१२६
विश्व-गर्भा[६३७] स्वर्ण - गर्भावरदा[६३८-३९] वागधीश्वरी[६४०]।
ध्यान-गम्याऽपरिच्छेद्या[६४१-४२], ज्ञानदा[६४३] ज्ञान-विग्रहा[६४४]।।१२७
सर्व-वेदान्त-संवेद्या[६४५], सत्यानन्द - स्वरूपिणी[६४६]।
लोपा-मुद्रार्चिता[६४७] लीला-क्लृप्त-ब्रह्माण्ड-मण्डला[६४८]।।१२८
अदृश्या[६४९] दृश्य-रहिता[६५०], विज्ञात्री[६५१] वेद्य-वर्जिता[६५२]।
योगिनी[६५३] योगदा[६५४] योग्या[६५५], योगानन्द - युग - धरा[६५६]।।१२९

इच्छा-शक्ति-ज्ञान-शक्ति-क्रिया-शक्ति-स्वरूपिणी[६५७]।
सर्वाधारा[६५८] सु-प्रतिष्ठा[६५९], सदसद्-रूप-धारिणी[६६०]।।१३०
अष्ट-मूर्तिरजा-जैत्री[६६१-६३], लोक-यात्रा-विधायिनी[६६४]।
एकाकिनी[६६५] भूम-रूपा[६६६], निर्द्वैता[६६७] द्वैत-वर्जिता[६६८]।।१३१
अन्नदा[६६९] वसुदा[६७०] वृद्धा[६७१], ब्रह्मात्मैक्य-स्वरूपिणी[६७२]।
वृहती[६७३] ब्राह्मणी[६७४] ब्राह्मी[६७५], ब्रह्मानन्दा[६७६] बलि-प्रिया[६७७]।।१३२
भाषा-रूपा[६७८] बृहत्-सेना[६७९], भावाभाव-विवर्जिता[६८०]।
सुखाराध्या[६८१] शुभ-करी[६८२], शोभना[६८३] सुलभा - गतिः[६८४]।।१३३
राज-राजेश्वरी[६८५] राज्य-दायिनी[६८६] राज्य-वल्लभा[६८७]।
राजत्-कृपा[६८८] राज-पीठ-निवेशित-निजाश्रिता[६८९]।।१३४
राज्य-लक्ष्मीः[६९०] कोश-नाथा[६९१], चतुरङ्ग-बलेश्वरी[६९२]।
साम्राज्य-दायिनी[६९३] सत्य-सन्धा[६९४] सागर-मेखला[६९५]।।१३५
दीक्षिता[६९६] दैत्य-शमनी[६९७], सर्व-लोक-वशङ्करी[६९८]।
सर्वार्थ-दात्री[६९९] सावित्री[७००], सच्चिदानन्द-रूपिणी[७०१]।।१३६
देश-कालापरिच्छिन्ना[७०२], सर्वगा[७०३] सर्व-मोहिनी[७०४]।
सरस्वती[७०५] शास्त्र-मयी[७०६], गुहाम्बा[७०७] गुह्य-रूपिणी[७०८]।।१३७
सर्वोपाधि-विनिर्मुक्ता[७०९], सदा-शिव-पति-व्रता[७१०]।
सम्प्रदायेश्वरी[७११] साध्वी[७१२], गुरु-मण्डल-रूपिणी[७१३]।।१३८
कुलोत्तीर्णा[७१४] भगाराध्या[७१५], माया[७१६] मधु-मती[७१७] मही[७१८]।
गणाम्बा[७१९] गुह्यकाराध्या[७२०], कोमलाङ्गी[७२१] गुरु-प्रिया[७२२]।।१३९
स्वतन्त्रा[७२३] सर्व-तन्त्रेशी[७२४], दक्षिणा-मूर्ति-रूपिणी[७२५]।
सनकादि - समाराध्या[७२६], शिव - ज्ञान - प्रदायिनी[७२७]।।१४०

चित्-कलानन्द-कलिका[728-29], प्रेम-रूपा[730] प्रियङ्करी[731]।
नाम-पारायण-प्रीता[732], नन्दि-विद्या[733] नटेश्वरी[734]।।१४१
मिथ्या-जगदधिष्ठाना[735], मुक्तिदा[736] मुक्ति-रूपिणी[737]।
लास्य-प्रिया[738] लय-करी[739], लज्जा[740] रम्भादि-वन्दिता[741]।।१४२
भव - दाव - सुधा - वृष्टिः[742], पापारण्य - दावानला[743]।
दौर्भाग्य-तूल-वातूला[744], जरा-ध्वान्त-रवि-प्रभा[745]।।१४३
भाग्याब्धि-चन्द्रिका[746] भक्त-चित्त-केकि-घनाघना[747]।
रोग - पर्वत - दम्भोलिः[748], मृत्यु - दारु - कुठारिका[749]।।१४४
महेश्वरी[750] महा-काली[751], महा-ग्रासा[752] महाऽशना[753]।
अपर्णा[754] चण्डिका[755] चण्ड-मुण्डासुर-निषूदिनी[756]।।१४५
क्षराक्षरात्मिका[757] सर्व-लोकेशी[758] विश्व-धारिणी[759]।
त्रि-वर्ग-दात्री[760] सुभगा[761], त्र्यम्बिका[762] त्रिगुणात्मिका[763]।।१४६
स्वर्गापवर्गदा[764] शुद्धा[765], जपा-पुष्प-निभाऽऽकृतिः[766]।
ओजोवती[767] द्युति-धरा[768], यज्ञ-रूपा[769] प्रिय-व्रता[770]।।१४७
दुराराध्या[771] दुराधर्षा[772], पाटली - कुसुम - प्रिया[773]।
महती[774] मेरु-निलया[775], मन्दार - कुसुम - प्रिया[776]।।१४८
वीराराध्या[777] विराट्-रूपा[778], विरजा[779] विश्वतोमुखी[780]।
प्रत्यग्-रूपा[781] परा-काशा[782], प्राणदा[783] प्राण-रूपिणी[784]।।१४९
मार्तण्ड-भैरवाराध्या[785], मन्त्रिणी-न्यस्त-राज्य-धूः[786]।
त्रिपुरेशी[787] जयत्-सेना[788], निस्त्रैगुण्या[789] परापरा[790]।।१५०
सत्य - ज्ञानानन्द - रूपा[791], सामरस्य - परायणा[792]।
कपर्दिनी[793] कला-माला[794], काम-धुक्[795] काम-रूपिणी[796]।।१५१

कला-निधिः[७९७] काव्य-कला[७९८], रसज्ञा[७९९] रस-शेवधिः[८००]।
पुष्टा[८०१] पुरातना[८०२] पूज्या[८०३], पुष्करा[८०४] पुष्करेक्षणा[८०५]।।१५२
परं-ज्योतिः[८०६] परं-धाम[८०७], परमाणुः[८०८] परात्परा[८०९]।
पाश-हस्ता[८१०] पाश-हन्त्री[८११], पर-मन्त्र-विभेदिनी[८१२]।।१५३
मूर्ताऽमूर्ता[८१३-१४] नित्य-तृप्ता[८१५], मुनि-मानस-हंसिका[८१६]।
सत्य-व्रता[८१७] सत्य-रूपा[८१८], सर्वान्तर्यामिणी[८१९] सती[८२०]।।१५४
ब्रह्माणी[८२१] ब्रह्मा[८२२] जननी[८२३], बहु-रूपा[८२४] बुधार्चिता[८२५]।
प्रसवित्री[८२६] प्रचण्डाऽऽज्ञा[८२७-२८], प्रतिष्ठा[८२९] प्रकटाकृतिः[८३०]।।१५५
प्राणेश्वरी[८३१] प्राण-दात्री[८३२], पञ्चाशत्-पीठ-रूपिणी[८३३]।
विशृङ्खला[८३४] विविक्तस्था[८३५], वीर-माता[८३६] वियत्-प्रसूः[८३७]।।१५६
मुकुन्दा[८३८] मुक्ति-निलया[८३९], मूल-विग्रह-रूपिणी[८४०]।
भावज्ञा[८४१] भाव-रोगघ्नी[८४२], भव-चक्र-प्रवर्त्तिनी[८४३]।।१५७
छन्दः-सारा[८४४] शास्त्र-सारा[८४५], मन्त्र-सारा[८४६] तलोदरी[८४७]।
उदार - कीर्तिरुद्दाम-वैभवा[८४८-४९] वर्ण-रूपिणी[८५०]।।१५८
जन्म - मृत्यु - जरा-तप्त-जन-विश्रान्ति-दायिनी[८५१]।
सर्वोपनिषदुद्घुष्टा[८५२], शान्त्यतीत - कलात्मिका[८५३]।।१५९
गम्भीरा[८५४] गगनान्तःस्था[८५५], गर्विता[८५६] गान-लोलुपा[८५७]।
कल्पना-रहिता[८५८] काष्ठाकान्ता[८५९-८६०] कान्तार्ध-विग्रहा[८६१]।।१६०
कार्य-कारण-निर्मुक्ता[८६२], काम - केलि - तरङ्गिता[८६३]।
कनत्-कनक-ताटङ्का[८६४], लीला-विग्रह-धारिणी[८६५]।।१६१
अजा[८६६] क्षय-विनिर्मुक्ता[८६७] मुग्धा[८६८] क्षिप्र-प्रसादिनी[८६९]।
अन्तर्मुख - समाराध्या[८७०], बहिर्मुख - सुदुर्लभा[८७१]।।१६२

त्रयी[८७२] त्रिवर्ग-निलया[८७३], त्रिस्था[८७४] त्रिपुर-मालिनी[८७५]।
निरामया[८७६] निरालम्बा[८७७], स्वात्मा-रामा[८७८] सुधा-स्रुतिः[८७९]।।१६३
संसार - पङ्क - निर्मग्न - समुद्धरण - पण्डिता[८८०]।
यज्ञ-प्रिया[८८१] यज्ञ-कर्त्री[८८२], यज-मान-स्वरूपिणी[८८३]।।१६४
धर्माधारा[८८४] धनाध्यक्षा[८८५], धन-धान्य-विवर्धिनी[८८६]।
विप्र-प्रिया[८८७] विप्र-रूपा[८८८], विश्व-भ्रमण-कारिणी[८८९]।।१६५
विश्व-ग्रासा[८९०] विद्रुमाभा[८९१], वैष्णवी[८९२] विष्णु-रूपिणी[८९३]।
अयोनिर्योनि-निलया[८९४-९५], कूटस्था[८९६] कुल-रूपिणी[८९७]।।१६६
वीर-गोष्ठी-प्रिया[८९८] वीरा[८९९], नैष्कर्म्या[९००] नाद-रूपिणी[९०१]।
विज्ञान-कलना[९०२] कल्या[९०३], विदग्धा[९०४] वैन्दवासिनी[९०५]।।१६७
तत्त्वाधिका[९०६] तत्त्व-मयी[९०७], तत्त्वमर्थ-स्वरूपिणी[९०८]।
साम-गान-प्रिया[९०९] सौम्या[९१०], सदा-शिव-कुटुम्बिनी[९११]।।१६८
सव्यापसव्य-मार्गस्था[९१२], सर्वापद्-विनिवारिणी[९१३]।
स्वस्था[९१४] स्वभाव-मधुरा[९१५], धीरा[९१६] धीर-समर्चिता[९१७]।।१६९
चैतन्यार्घ्य-समाराध्या[९१८], चैतन्य - कुसुम - प्रिया[९१९]।
सदोदिता[९२०] सदा - तुष्टा[९२१], तरुणादित्य - पाटला[९२२]।।१७०
दक्षिणाऽदक्षिणाराध्या[९२३], दर - स्मेर - मुखाम्बुजा[९२४]।
कौलिनी - केवलाऽनर्घ्य - कैवल्य - पद - दायिनी[९२५-२६]।।१७१
स्तोत्र-प्रिया[९२७] स्तुति-मती[९२८], श्रुति-संस्तुत-वैभवा[९२९]।
मनस्विनी[९३०] मान-वती[९३१], महेशी[९३२] मङ्गलाकृतिः[९३३]।।१७२
विश्व-माता[९३४] जगद्धात्री[९३५], विशालाक्षी[९३६] विरागिणी[९३७]।
प्रगल्भा[९३८] परमोदारा[९३९], पराऽऽमोदा[९४०] मनो-मयी[९४१]।।१७३

व्योम-केशी[१४२] विमानस्था[१४३], वज्रिणी[१४४] वामकेश्वरी[१४५]।
पञ्च-यज्ञ-प्रिया[१४६] पञ्च-प्रेत-मञ्चाधि-शायिनी[१४७]।।१७४
पञ्चमी[१४८] पञ्च-भूतेशी[१४९], पञ्च-संख्योपचारिणी[१५०]।
शाश्वती[१५१] शाश्वतैश्वर्या[१५२], शर्मदा[१५३] शम्भु-मोहिनी[१५४]।।१७५
धरा[१५५] धर-सुता[१५६] धन्या[१५७]. धर्मिणी[१५८] धर्म-वर्धिनी[१५९]।
लोकातीता[१६०] गुणातीता[१६१], सर्वातीता[१६२] शमात्मिका[१६३]।।१७६
बन्धूक-कुसुम-प्रख्या[१६४], बाला[१६५] लीला-विनोदिनी[१६६]।
सुमङ्गली[१६७] सुख-करी[१६८], सु-वेषाढ्या[१६९] सु-वासिनी[१७०]।।१७७
सुवासिन्यर्चन-प्रीताऽऽशोभना[१७१-७२] शुद्ध-मानसा[१७३]।
विन्दु - तर्पण-सन्तुष्टा[१७४], पूर्वजा[१७५] त्रिपुराऽम्बिका[१७६]।।१७८
दश - मुद्रा - समाराध्या[१७७], त्रिपुराश्री - वशङ्करी[१७८]।
ज्ञान-मुद्रा[१७९] ज्ञान-गम्या[१८०], ज्ञान-ज्ञेय-स्वरूपिणी[१८१]।।१७९
योनि-मुद्रा[१८२] त्रिखण्डेशी[१८३], त्रिगुणाम्बा[१८४-८५] त्रिकोणगा[१८६]।
अनघाऽद्भुत-चरित्रा[१८७-८८], वाञ्छितार्थ-प्रदायिनी[१८९]।।१८०
अभ्यासातिशय - ज्ञाता[१९०], षडध्वातीत - रूपिणी[१९१]।
अव्याज-करुणा-मूर्तिः[१९२], अज्ञान-ध्वान्त-दीपिका[१९३]।।१८१
आबाल-गोप-विदिता[१९४], सर्वानुल्लङ्घ्य-शासना[१९५]।
श्रीचक्रराज - निलया[१९६], श्रीमत् - त्रिपुर - सुन्दरी[१९७]।
श्रीशिवा[१९८] शिव-शक्त्यैक्य-रूपिणी[१९९] ललिताऽम्बिका[१०००]ॐ।।१८२

अन्त में विनियोग, ऋष्यादि-न्यास, कर-षडङ्ग-न्यास, ध्यान तथा मानस-पूजन पुनः करे। यथा–

।।विनियोगः।।

ॐ अस्य श्रीललिता-सहस्र-नाम-स्तोत्र-माला-मन्त्रस्य श्रीवशिन्यादि-वाग्-देवता ऋषयः। अनुष्टुप् छन्दः। श्रीललिताऽम्बा देवता। कएईलह्रीं बीजम्। सकलह्रीं शक्तिः। हसकहलह्रीं कीलकम्। श्रीललिताऽम्बा-प्रीत्यर्थे पाठे विनियोगः।

।।ऋष्यादि-न्यास।।

श्रीवशिन्यादि-वाग्-देवता-ऋषिभ्यो नमः शिरसि। अनुष्टुप्-छन्दसे नमः मुखे। श्रीललिताऽम्बा देवतायै नमः हृदि। कएईलह्रीं-बीजाय नमः गुह्ये। सकलह्रीं-शक्तये नमः पादयोः। हसकहलह्रीं - कीलकाय नमः सर्वाङ्गे। श्रीललिताऽम्बा-प्रीत्यर्थे पाठे विनियोगाय नमः अञ्जलौ।

	कर-न्यास	अङ्ग-न्यास
ऐं कएईलह्रीं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
क्लीं हसकहलह्रीं	तर्जनीभ्यां नमः	शिरसे स्वाहा
सौः सकलह्रीं	मध्यमाभ्यां नमः	शिखायै वषट्
ऐं कएईलह्रीं	अनामाभ्यां नमः	कवचाय हुम्
क्लीं हसकहलह्रीं	कनिष्ठाभ्यां नमः	नेत्र-त्रयाय वौषट्
सौः सकलह्रीं	करतल-करपृष्ठाभ्यां नमः	अस्त्राय फट्

।।ध्यानम्।।

सिन्दूरारुण-विग्रहां त्रि-नयनां माणिक्य-मौलि-स्फुरत्-
तारा-नायक-शेखरां स्मित-मुखीमापीन-वक्षो-रुहाम्।
पाणिभ्यामलि-पूर्ण-रत्न-चषकं रक्तोत्पलं बिभ्रतीम्,
सौम्यां रत्न-घटस्थ-रक्त-चरणां ध्याये परामम्बिकाम्।।

।।मानस पूजन।।

ॐ लं पृथिव्यात्मकं गन्धं श्रीललिताम्बा-प्रीतये समर्पयामि नमः (अधो-मुख कनिष्ठा-अंगुष्ठ)।
ॐ हं आकाशात्मकं पुष्पं श्रीललिताम्बा-प्रीतये समर्पयामि नमः (अधो-मुख तर्जनी-अंगुष्ठ)।
ॐ यं वाय्वात्मकं धूपं श्रीललिताम्बा-प्रीतये घ्रापयामि नमः (ऊर्ध्व-मुख तर्जनी-अंगुष्ठ)।
ॐ रं वह्न्यात्मकं दीपं श्रीललिताम्बा-प्रीतये दर्शयामि नमः (ऊर्ध्व-मुख मध्यमा-अंगुष्ठ)।
ॐ वं अमृतात्मकं नैवेद्यं श्रीललिताम्बा-प्रीतये निवेदयामि नमः (ऊर्ध्व-मुख अनामा-अंगुष्ठ)।
ॐ सं सर्वात्मकं ताम्बूलं श्रीललिताम्बा-प्रीतये समर्पयामि नमः (ऊर्ध्व-मुख सर्वांगुलि)।

इसके बाद प्रार्थना करे-

अनेन श्रीललिता-सहस्र-नाम-स्तोत्र-पाठेन
श्रीराज-राजेश्वरी महा-त्रिपुर-सुन्दरी देवता प्रीयताम्।

।।ॐ तत् सत्।।

।।फल-श्रुति।।

।।श्रीहयग्रीव उवाच।।

इत्येवं नाम - साहस्त्रं, कथितं ते घटोद्भव!।
रहस्यानां रहस्यं च, ललिता - प्रीति - दायकम्।।०१
अनेन सदृशं स्तोत्रं, न भूतं न भविष्यति।
सर्व - रोग - प्रशमनं, सर्व - सम्पत् - प्रवर्धनम्।।०२
सर्वापमृत्यु - शमनं, काल - मृत्यु - निवारणम्।
सर्व - ज्वरार्ति - शमनं, दीर्घायुष्य - प्रदायकम्।।०३
पुत्र - प्रदमपुत्राणां, पुरुषार्थ - प्रदायकम्।
इदं विशेषाच्छ्री-देव्याः, स्तोत्रं प्रीति-विधायकम् ।।०४
जपेन्नित्यं प्रयत्नेन, ललितोपास्ति - तत्परः।
प्रातः स्नात्वा विधानेन, सन्ध्या - कर्म समाप्य च।।०५
पूजा - गृहं ततो गत्वा, चक्र - राजं समर्चयेत्।
विद्यां जपेत् सहस्त्रं वा, त्रि - शतं शतमेव वा।।०६
रहस्य - नाम - साहस्त्रमिदं पश्चात् पठेन्नरः।
जन्म - मध्ये सकृच्चापि, य एतत् पठते सुधीः।।०७
तस्य पुण्य - फलं वक्ष्ये, शृणु त्वं कुम्भ-सम्भव!।
गङ्गादि-सर्व-तीर्थेषु, यः स्नायात् कोटि-जन्मसु।।०८
कोटि - लिङ्ग - प्रतिष्ठां तु, यः कुर्यादविमुक्तके।
कुरु - क्षेत्रे च यो दद्यात्, कोटि - वारं रवि - ग्रहे।।०९
कोटिं सौवर्ण - भाराणां, श्रोत्रियेषु द्वि-जन्मसु।
यः कोटिं हय - मेधानामाहरेद् गाङ्ग - रोधसि।।१०
आचरेत् कूप - कोटीर्यो, निर्जले मरु - भू - तले।
दुर्भिक्षे यः प्रति-दिनं, कोटि - ब्राह्मण - भोजनम् ।।११
श्रद्धया परया कुर्यात्, सहस्त्र - परि - वत्सरान्।
तत्-पुण्यं कोटि-गुणितं, लभेत् पुण्यमनुत्तमम् ।।१२

रहस्य - नाम - साहस्त्रे, नाम्नोऽप्येकस्य कीर्तनात्।
रहस्य - नाम - साहस्त्रे, नामैकमपि यः पठेत्।।१३
तस्य पापानि नश्यन्ति, महान्त्यपि न संशयः।
नित्य - कर्माननुष्ठानान्निषिद्ध - करणादपि।।१४
यत् - पापं जायते पुंसां, तत्-सर्वं नश्यति ध्रुवम् ।
बहुनाऽत्र किमुक्तेन, शृणु त्वं कलशी - सुत!।।१५
अत्रैक - नाम्नो या शक्तिः, पातकानां निवर्तने।
तन्निवर्त्यमघं कर्तुं, नालं लोकाश्चतुर्दश।।१६
यस्त्यक्त्वा नाम - साहस्त्रं, पाप - हानिमभीप्सति।
स हि शीत - निवृत्त्यर्थं, हिम - शैलं निषेवते।।१७
भक्तो यः कीर्तयेन्नित्यमिदं नाम - सहस्त्रकम्।
तस्मै श्रीललिता देवी, प्रीताऽभीष्टं प्रयच्छति।।१८
अकीर्तयन्निदं स्तोत्रं, कथं भक्तो भविष्यति?
नित्यं सङ्कीर्तनाशक्तः, कीर्तयेत् पुण्य - वासरे।
संक्रान्तौ विषुवे चैव, स्व - जन्म - त्रितयेऽयने।।१९
नवम्यां वा चतुर्दश्यां, सितायां शुक्र - वासरे।
कीर्तयेन्नाम - साहस्त्रं, पौर्णमास्यां विशेषतः।।२०
पौर्णमास्यां चन्द्र-बिम्बे, ध्यात्वा श्रीललिताम्बिकाम्।
पञ्चोपचारैः सम्पूज्य, पठेन्नाम - सहस्त्रकम्।।२१
सर्व - रोगाः प्रणश्यन्ति, दीर्घायुष्यं च विन्दति।
अयमायुष्करो नाम, प्रयोगः कल्पनोदितः।।२२
ज्वरार्तं शिरसि स्पृष्ट्वा, पठेन्नाम - सहस्त्रकम्।
तत्-क्षणात् प्रशमं याति, शिरस्तोदो ज्वरोऽपि च।।२३
सर्व-व्याधि-निवृत्त्यर्थं, स्पृष्ट्वा भस्म जपेदिदम्।
तद् - भस्म-धारणादेव, नश्यन्ति व्याधयो क्षणात्।।२४

जलं संमन्त्र्य कुम्भस्थं, नाम - साहस्रतो मुने!।
अभिषिञ्चेद् ग्रह-ग्रस्तान्, ग्रहा नश्यन्ति तत्क्षणात् ।।२५
सुधा-सागर-मध्यस्थां, ध्यात्वा श्रीललिताऽम्बिकाम्।
यः पठेन्नाम - साहस्रं, विषं तस्य विनश्यति।।२६
वन्ध्यानां पुत्र - लाभाय, नाम - साहस्र - मन्त्रितम्।
नवनीतं प्रदद्यात्तु, पुत्र - लाभो भवेद् ध्रुवम् ।।२७
देव्याः पाशेन सम्बद्धामाकृष्टामंकुशेन च।
ध्यात्वाऽभीष्टां स्त्रियं रात्रौ, पठेन्नाम - सहस्रकम् ।।२८
आयाति स्व - समीपं, सा यद्यप्यन्तः - पुरं गता।
राजाऽऽकर्षण - कामश्चेद्, राजाऽवसथ-दिङ्-मुखः।।२९
त्रि - रात्रं यः पठेदेतच्छ्री - देवी - ध्यान - तत्परः।
स राजा पार - वश्येन, मातङ्गं वा मतङ्गजम् ।।३०
आरुह्याऽऽयाति निकटं, दास - वत् प्रणिपत्य च।
तस्मै राज्यं च कोशं च, ददात्येव वशं गतः।।३१
रहस्य - नाम - साहस्रं, यः कीर्तयति नित्यशः।
तन्मुखालोक - मात्रेण, मुह्येल्लोक - त्रयं मुने!।।३२
यस्त्विदं नाम - साहस्रं, सकृत् पठति भक्ति - मान्।
तस्य ये शत्रवस्तेषां, निहन्ता शरभेश्वरः।।३३
यो वाऽभिचारं कुरुते, नाम - साहस्र - पाठके।
निर्वर्त्य तत् - क्रियां हन्यात्, तं वै प्रत्यङ्गिरा स्वयम् ।।३४
ये क्रूर - दृष्ट्या वीक्ष्यन्ते, नाम-साहस्र-पाठकम्।
तानन्धान् कुरुते क्षिप्रं, स्वयं मार्तण्ड - भैरवः।।३५
धनं यो हरते चोरैर्नाम - साहस्र - जापिना।
यत्र कुत्र स्थितं वापि, क्षेत्रपालो निहन्ति तम्।।३६
विद्यासु कुरुते वादं, यो विद्वान् नाम - जापिना।
तस्य वाक् - स्तम्भनं सद्यः, करोति नकुलेश्वरी।।३७

यो राजा कुरुते वैरं, नाम साहस्र - जापिना।
चतुरङ्ग - बलं तस्य, दण्डिनी संहरेत् स्वयम् ।।३८
यः पठेन्नाम - साहस्त्रं, षण्मासं भक्ति - संयुतः।
लक्ष्मीश्चाञ्चल्य - रहिता, सदा तिष्ठति तद् - गृहे।।३९
मासमेकं प्रति - दिनं, त्रि - वारं यः पठेन्नरः।
भारती तस्य जिह्वाग्रे, रङ्गे नृत्यति नित्यशः।।४०
यस्त्वेक - वारं पठति, पक्षमेकमतन्द्रितः।
मुह्यन्ति काम - वशगा, मृगाक्ष्यस्तस्य वीक्षणात्।।४१
यः पठेन्नाम - साहस्त्रं, जन्म - मध्ये सकृन्नरः।
तद्-दृष्टि-गोचराः सर्वे, मुच्यन्ते सर्व-किल्विषैः।।४२
यो वेत्ति नाम - साहस्त्रं, तस्मै देयं द्वि - जन्मने।
अन्नं वस्त्रं धनं धान्यं, नान्येभ्यस्तु कदाचन।।४३
श्रीमन्त्र - राजं यो वेत्ति, श्री - चक्रं यः समर्चति।
यः कीर्तयति नामानि, तं सत् - पात्रं विदुर्बुधाः।।४४
तस्मै देयं प्रयत्नेन, श्रीदेवी - प्रीतिमिच्छता।।४५
न कीर्तयति नामानि, मन्त्र - राजं न वेत्ति यः।
पशु - तुल्यः स विज्ञेयस्तस्मै दत्तं निरर्थकम्।।४६
परीक्ष्य विद्या - विदुषस्तेभ्यो दद्याद् विचक्षणः।।४७
श्रीमन्त्र - राज - सदृशो, यथा मन्त्रो न विद्यते।
देवता ललिता - तुल्या, यथा नास्ति घटोद्भव!
रहस्य - नाम - साहस्र-तुल्या नास्ति तथा स्तुतिः।।४८
लिखित्वा पुस्तके यस्तु, नाम - साहस्रमुत्तमम्।
समर्चयेत् सदा भक्त्या, तस्य तुष्यति सुन्दरी।।४९
बहुनाऽत्र किमुक्तेन, शृणु त्वं कुम्भ - सम्भव!।
नानेन सदृशं स्तोत्रं, सर्व - तन्त्रेषु विद्यते।।५०

तस्मादुपासको नित्यं, कीर्तयेदिदमादरात् ।
एभिर्नाम - सहस्त्रैस्तु, श्री - चक्रं योऽर्चयेत् सकृत् ।।५१
पद्मैर्वा तुलसी - पुष्पैः, कह्लारैर्वा कदम्बकैः।
चम्पकैर्जाति - कुसुमैर्मल्लिका - करवीरकैः।।५२
उत्पलैर्विल्व - पत्रैर्वा, कुन्द - केसर - पाटलैः।
अन्यैः सुगन्धि - कुसुमैः, केतकी - माधवी - मुखैः।।५३
तस्य पुण्य - फलं वक्तुं, न शक्नोति महेश्वरः।।५४
सा वेत्ति ललिता देवी, स्व - चक्रार्चनजं फलम्।
अन्ये कथं विजानीयुर्ब्रह्माद्याः स्वल्प - मेधसः?।।५५
प्रति - मासं पौर्णमास्यामेभिर्नाम - सहस्रकैः।
रात्रौ यश्चक्र - राजस्थामर्चयेत् पर - देवताम् ।।५६
स एव ललिता - रूपस्तद् - रूपा ललिता स्वयम्।
न तयोर्विद्यते भेदो, भेद - कृत् पाप-कृद् भवेत् ।।५७
महा-नवम्यां यो भक्तः, श्रीदेवीं चक्र-मध्यगाम्।
अर्चयेन्नाम - साहस्रैस्तस्य मुक्तिः करे स्थिता।।५८
यस्तु नाम - साहस्त्रेण, शुक्र - वारे समर्चयेत् ।
चक्र - राजे महा - देवीं, तस्य पुण्य - फलं श्रृणु।।५९
सर्वान् कामानवाप्येह, सर्व - सौभाग्य - संयुतः।
पुत्र-पौत्रादि-संयुक्तो, भुक्त्वा भोगान् यथेप्सितान् ।।६०
